८८ रूपकातिशयोक्तिः "रूपकातिशयोक्तिः स्यान्निगीर्य्याध्यवसानतः" च० "पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः"

८९ ललितम् "प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम्"। ललितं निर्गते नीरे सेतुमेषा चिकीर्षति च०।

९० लेशः "लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम्"। च० "अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु। शुक ! पिञ्जरबन्धस्ते मधुराणां गिरां फलम्"। स०कं०त लवत्वेनायमुक्तः।

९१ लोकोक्तिः "लोकप्रवादानुकृतिर्लोकोक्तिरिति" कथ्यते च०। "सहस्व कतिचिन्मासान् मीलयित्वा विलोचने"।

९२ विकल्पः "विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः" च०। "सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः"।

९३ विकस्वरः "यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः"। च० "स न जिग्ये महान्तो हि दुर्जयाः सागरा इव"।

९४ विचित्रम् "विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् च०। "प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विमुञ्चति प्राणान्। दुःखीयति सुखहेतोः कोमूढः सेवकादन्यः"।

९५ वितर्कः "ऊहो वितर्कः सन्देहनिर्णयान्तरधिष्ठितः। द्विधासौ निर्णयान्तश्चानिर्णयान्तश्च कीर्त्त्यते। तत्त्वानुपात्यतत्त्वानुपाती यश्चोभयात्मकः" स०कण्ठा०। तेषु निर्णयान्तस्तत्त्वानुपाती यथा। "मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहता शक्तिस्तस्य कुतः ? स वज्रपतनाद्भीतो महेन्द्रादपि। तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणमा ज्ञातं स जटायुरेष जरसा क्लिष्टो बधं वाञ्छति"। स एवातत्त्वानुपाती यथा। "अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः शृङ्गारैकनिधिः स्वयं नु मदनो मासो नु पुष्पाकरः। वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेत् मनोरममिदं रूपं पुराणो मुनिः" चन्द्रादिष्वन्यतमेन प्रजापतिना भवितव्यमित्यतत्त्वानुपाती निर्णयान्तो वितर्कः। स एव उभयात्मा यथा "चित्ते निवेश्य परिकल्पितसत्त्वयोगाद्रूपोच्चयेन रचिता मनसा कृता नु। स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः" अत्र तत्त्वातत्त्वानुपातित्वादुभयात्मा निर्णयान्तो वितर्कः। अनिर्णयान्तो मिथ्याविषयो यथा। "अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः"। स एवामिथ्यारूपो यथा। "अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना। समधिरूढमनेन च जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः"। स एव उभयात्मा यथा। माया स्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्य्यमथाहमन्यः। गाण्डीवमुक्ता हि यथा पुरा मे पराक्रमन्ते न शराः किराते"।

९६ विधिः "सिद्धस्यैव विधानं यत् तामाहुर्विध्यलङ्कृतिम्" च०। "पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्"।

९७ विध्याभासः वस्तुनोवक्तुमिष्टस्य तु विशेषप्रतिपत्तये। निषेधाभास आक्षेपो वक्ष्यमाणोक्तगोद्विधा। अनिष्टस्य तथार्थस्य विध्याभासः परोमत इति" सा०द०। उदाहरणं तत्र ज्ञेयम्। आक्षेपभेद इत्यन्ये।

९८ विनोक्तिः "विनोक्तिः स्याद्विना किञ्चित् प्रस्तुतं हीनमुच्यते। तच्चेत् किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते"। च०हीनत्वे "विद्या हृद्यापि सावद्या विना विनयसम्पदम्"। रम्यत्वे "विना खलैर्विभात्येषा राजेन्द्र ! भवतः सभा"। विनार्थसम्बन्धतायामपि सा०द०। "निरर्थकं जन्मगतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्। उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन"।

९९ विभावना "विभावना विनापि स्यात् कारणं कार्य्यजन्म चेत्१ हेतूनामसमग्रत्वे कार्य्योत्पत्तिश्च सा मता२। कार्य्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके३ अकारणात् कार्य्यजन्म चतुर्थी स्याद्विभावना४। विरुद्धात् कार्य्यसम्पत्तिर्दृष्टा काचिद्विभावना५। कार्य्यात् कारणजन्मापि दृष्टा काचित् विभावना६" च०। क्रमेण यथा। "अपि लाक्षारसाऽसिक्तं रक्तं ते चरणद्वयम्"१। "अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः"।२। "नरेन्द्रानेव ते राजन् दशत्यसिभुजङ्गमः"।३। नरेन्द्रोऽन्यपो गरुडविद्याभिज्ञस्य दंशनप्रतिबन्धकगारुड़विद्यासन्निधानेऽपि दंशनोत्पत्तेस्तृतीया विभावना" "शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतम्"।४। "शीतांशुकिरणास्तन्वीं हन्त सन्तापयन्ति ताम्"।५। "यशःपयोराशिरभूत् करकल्पतरोस्तव"।६। दर्पणे तु "विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते। उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता" इति लक्षयित्वा "विना कारणमुपनिबध्यमानोऽपि कार्य्योदयः किञ्चिदन्यत् कारणमपेक्ष्यैव भवितुं युक्तं तच्च कारणान्तरं क्वचिदुक्तं क्वचिन्नेति" व्यवस्थाप्य उदाहृतम् "अनायासकृशं मध्यमशङ्कतरले दृशौ। अभूषणमनोहारि वपुर्वयसि सुभ्रुवः"। अत्र वयोरूपं निमित्तमुक्तम् "वपुर्भाति मतभ्रुत इति पाठे तदनुक्तमिति भेदः।

१०० विरोधः "जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।